# Shivodvahagamanavarnanam

# શિવોદ્વાહગમનવર્ણનમ્

## Document Information

Text title : Shivodvahagamanavarnanam

File name : shivodvAhagamanavarNanam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | IshAkhyaH dvAdashamAMshaH | adhyAyaH 17 shivodvAhagamanavarNanam | 5-74 ||

Latest update : December 28, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 28, 2024

*sanskritdocuments.org*

# શિવોદ્વાહગમનવર્ણનમ્

(શિવરહસ્યાન્તર્ગતે ઈશાખ્યે)

શિવ ઉવાચ ।

નન્દિન્ મદ્ગણપા યત્ર સમાયાન્તુ મદન્તિકમ્ ॥ ૫॥

વિષ્ણો સન્નહ્યતાં સેના સુરાણામસ્ત્રશોભિતા ।
નદી વિષ્ણુઃ પ્રણમ્યે શક્રમાજ્ઞાપયંસ્તદા ॥ ૬॥

હરિરુવાચ ।

સન્નહ્યતાં મહાસેના સુરાણાં સુપતાકિની ।
મા વિલમ્બો ભવત્વત્ર નિર્ગચ્છતિ મહેશ્વરઃ ॥ ૭॥

ગિરીન્દ્રનિલયં દેવ્યાઃ કર્તું પાણિગ્રહં વિભુઃ ।



દેવપત્ન્યશ્ચ યાઃ સર્વા માતરો ભૂષણાન્વિતાઃ ॥ ૮॥

મણ્ડયિત્વા સ્વકાઙ્ગાનિ વાસોભૂષણગન્ધકૈઃ ।
પુષ્પૈર્દિવ્યાઙ્ગરાગૈશ્ચ નીરાજનકરાઃસ્ત્રિયઃ ॥ ૯॥

સમાગચ્છન્તુ દેવેશ-પાણિગ્રહણમઙ્ગલે ।
ઇન્દ્રોઽપ્યાજ્ઞાપયામાસ આનેતું માતલિં પ્રતિ ॥ ૧૦॥

સ માતલિસ્ત્વરાયુક્તો દેવસેનાં સમાનયત્ ।
શક્રસ્ય ગણપા યે ચ વજ્રોદ્યતકરાઃ શુભાઃ ॥ ૧૧॥

મકુટોજ્જ્વલમસ્તાસ્તે યુવાનો મૃષ્ટકુણ્ડલાઃ ।
રક્તચન્દનલિપ્તાઙ્ગા વાદ્યકાસ્તત્ર ચાગતાઃ ॥ ૧૨॥

પતાકાવૈજયન્તીભિઃ પટહાનકનિઃસ્વનૈઃ ।
તથા યમગણાસ્તત્ર કૃષ્ણાઙ્ગા વિકૃતાયુધાઃ ॥ ૧૩॥

કરાલદંષ્ટ્રોરુશિખા મુસલાયુધપાણયઃ ।
સમાગતા યમેનૈવ પાશદણ્ડાયુધેન ચ ॥ ૧૪॥

વારુણા ગણપાસ્તત્ર હરિતા બાહુશાલિના ।
પાશખડ્ગકરાઃ સર્વે નિયુતં વરુણેન હિ ॥ ૧૫॥

યક્ષાધિપેન સાહિતા યક્ષાઃ શિક્ષાવિશારદાઃ ।
પ્રયુતં ખડ્ગખેટાદ્યૈઃ સમાયાતા મદોદ્ધતાઃ ॥ ૧૬॥

વાયુના વાયુગણપાસ્તોમરાસક્તપાણયઃ ।
સમાયાતા(?)યુતં તત્ર ગન્ધસ્રગ્વરભૂષિતાઃ ॥ ૧૮॥

નિરૃતેર્ગણપા યેઽત્ર પ્રાસાસિવરપાણયઃ ।
દેવેન તેનચાયાતા અયુતં ભૂષણાન્વિતાઃ ॥ ૧૯॥

ઈશાનો ગણપૈસ્તત્ર સમાયાતાઃ સહસ્રશઃ ।
નિષઙ્ગિભિઃ કવચિભિર્હેતિતોમરપાણિભિઃ ॥ ૨૦॥

ઇષુમદ્ભિશ્ચાપધૃગ્ભિર્દિવિભૂમ્યન્તરિક્ષગૈઃ ।
અથાયાશ્ચ મરુતઃ સહસ્રાણ્યત્ર ષોડશ ॥ ૨૧॥

વસવો બલિનસ્તત્ર ત્રિંશત્સાહસ્રમૂર્જિતાઃ ।
દ્વાદશાદિત્યકાસ્તત્ર સહસ્રેણ પૃથક્ પૃથક્ ॥ ૨૨॥

સુધન્વાનસહસ્રેણ ધનુર્બાણકરા ગતાઃ ।
અશ્વિનૌ દ્વિસહસ્રેણ બલેન શરપાણિના ॥ ૨૩॥

નાગાઃ કિમ્પુરુષાઃ સિદ્ધા ગન્ધર્વા વાદ્યવાદકાઃ ।
પિશાચા ગરુડા યક્ષા રાક્ષસા દૈત્યનાયકાઃ ॥ ૨૪॥

નાગાશ્ચાપ્સરસો રૂપલાવણ્યા ગીતપેશલાઃ ।
પિતરો યાતુધાનાશ્ચ ડાકિન્યો યોગિનીગણાઃ ॥ ૨૫
(ધૃતનાનાવિધાસ્ત્રાશ્ચ ડાકિન્યો યોગિનીગણાઃ) ॥ ૨૫॥

કિન્નરા ભૈરવાસ્તત્ર ચામુણ્ડા શાકિનીગણાઃ ।
ગાવોઽથ માતરસ્તત્ર સમાયાતાઃ સુપેશલાઃ ॥ ૨૬॥

સર્વાભરણભૂષાઢ્યા સ્રુગ્ગન્ધાશ્ચ સુવાસસઃ ।
ધૃતનાનાવિધાસ્ત્રાશ્ચ નાનાવાદ્યકૃતાદરાઃ ॥ ૨૭॥

અથાદિતિર્દિતિર્લક્ષ્મીર્ધેનુર્વાણી ચ કાલિકા ।

પુલોમા વિપુલા ચૈવ સિઞ્ભિકા સુરસા તથા ॥ ૨૮॥

સિદ્ધિરૃદ્ધિઃ ક્રિયા દુર્ગા સ્વધાસ્વાહા દનુઃ કુહૂઃ ।
રાકા સ્પૃહા સિનીવાલી સ્વરા બુદ્ધિર્મતિઃ શચી ॥ ૨૯॥

અરુન્ધતી ચ સાવિત્રીગાયત્રીરોહિણીમુખાઃ ।
ગાર્ગી મૈત્રાયણી ચૈવ અનસૂયા પતિવ્રતા ॥ ૩૦॥

લોપામુદ્રા તથા ગાર્ગી સન્નતિઃ સુનતિઃ ક્ષુધા ।
રમ્ભા મૃણાલિકા ચૈવ મેનકા સહજન્યકા ॥ ૩૧॥

વિપ્રચિત્તિર્મિશ્રકેશી ઊર્વશી ચારુહાસિની ।
વિશ્વાચી ચ ઘૃતાચી ચ મિત્રવિન્દા અલમ્બુસા ॥ ૩૨॥

એતાશ્ચાપ્સરસાં શ્રેષ્ઠાઃ અપ્સરઃકોટયો નવ ।
હાવભાવમનોજ્ઞેન તૌર્યત્રિકયુતા યયુઃ ॥ ૩૩॥

સાગરા ગિરયો મેધ્યા નદ્યઃ સંવત્સરા ગ્રહાઃ ।
સોમેન સહિતાઃ સર્વે સામાયાતાસ્ત્રિકોટિકમ્ ॥ ૩૪॥

મનોહરેણ વેષેણ ઋક્ષાણિ ઋષયો મનુઃ ।
વેદા મન્ત્રાસ્તથા યજ્ઞાશ્છન્દાંસિ પ્રણવસ્તથા ॥ ૩૫॥

મન્ત્રગ્રામં તથા સર્વમ્પુરાણાનિ ચ શાસ્ત્રકમ્ ।
સ્વરૂપવેષાભરણાસ્તત્ર જગ્મુશ્ચ સઙ્ઘશઃ ॥ ૩૬॥

ઉદ્વાહઃ શઙ્કરસ્યેતિ દેવદેવાજ્ઞયા તદા ।
ભાસયન્તો ભૂષણૈશ્ચ શાસ્ત્રાણાં વાદઘોષણૈઃ ॥ ૩૭॥

ત્રિષષ્ટિકોટિતુરગાઃ રુક્મભાણ્ડપરિચ્છદાઃ ।
જવિનો બલસમ્પન્નાઃ સંસ્થિતાઃ સુરસાદિનઃ ॥ ૩૮॥

સુરધૃષ્ટાં મહીં ચક્રુર્હેષાભૂષૈકસન્મુખાઃ ।
તોમરાઙ્કુશબાણાગ્રપતાકાવલિભૂષિતાઃ ॥ ૩૯॥

ગજા મહામાત્રયુતા દન્તવેષ્ટશરાગ્રકાઃ ।
ઉદ્યત્કુમ્ભાઃ કર્ણતાલૈર્લમ્બિતાલોલચામરાઃ ॥ ૪૦॥

ત્રિંશત્કોટિર્યયુસ્તત્ર મેઘા ઇવ ભુવં ગતાઃ ।
રથાઃ પઞ્ચશતં કોટ્યઃ સુતરઙ્ગાઃ સુચક્રકાઃ ॥ ૪૧॥

સુપતાકાઃ સાવરોધા સદશ્વાઃ સમ્પ્રચોદિતાઃ ।
રથનેમિસ્વનૈસ્તત્ર ગજાશ્વવૃકબૃંહિતૈઃ ॥ ૪૨॥

ધૂયમાનપતાકાગ્રૈઃ શઙ્ખદુન્દુભિનિઃસ્વનૈઃ ।
બધિરીકૃતદિક્ચક્રં પઙ્ક્તિશઃ સંસ્થિતાઃ સુરાઃ ॥ ૪૩॥

પ્રણન્તું શ્રીમહેશાનં તત્ર તત્ર સ્વકાઃ સ્વકાઃ ।
ગણેન્દ્રા વારણેન્દ્રાભા નન્દિકેશઙ્ગયા ગતાઃ ॥ ૪૪॥

ઉદ્વાહઃ શઙ્કરસ્યેતિ તત્રાજગ્મુઃ પૃથક્ પૃથક્ ।
સૂર્યાભાઃ શઙ્ખવર્ણાશ્ચ રક્તનીલારુણપ્રભાઃ ॥ ૪૫॥

સુપીતા હરિતાસ્તત્ર યુવાનો બલશાલિનઃ ।
કોટ્યોઽથ સઙ્ખ્યા તેષાં તુ તત્ર નામાનિ વૈ શ઼ૃણુ ॥ ૪૬॥

નન્દિકેશોઽથ દશભિર્ભૈરવોઽષ્ટાભિરેવ ચ ।
ભૃઙ્ગી કોટિદ્વયેનાથ રિટિઃ કોટ્યા સમાયયૌ ॥ ૪૭॥

નવકોટ્યા વીરભદ્રઃ કાલાગ્નિર્દશકોટિભિઃ ।
બાણત્રયેણ વૃષભશ્ચણ્ડીશઃ પઞ્ચભિર્વૃતઃ ॥ ૪૮॥

નિયુતં ચ મહાનન્દી સોમનન્દી તથાઽયુતમ્ ।
દશભિઃ કેસરાક્ષશ્ચ વિદ્યુતોઽષ્ટભિરેવ ચ ॥ ૪૯॥

પઞ્ચભિસ્તુ કપાલીશઃ પઙ્ક્તિભિસ્ચ પિચણ્ડિલઃ ।
કુમ્ભકશ્ચ કુહુણ્ડશ્ચ દ્વિકોટિભ્યાં સમીયતુઃ ॥ ૫૦॥

વિષ્ટમ્ભઃ કોટિગણપૈર્ભેરુણ્ડશ્ચાત્ર કોટિતઃ ।
પિપ્પલઃ સદ્રથશ્ચૈવ પ્રયુતં નિયુતં તથા ॥ ૫૧॥

આયયૌ ચ સહસ્રાણાં નવત્યા ધુન્ધુલીગણઃ ।
સપ્તાશીતિસહસ્રેણ મહાકાલસ્તુ કોટિતઃ ॥ ૫૨॥

અભીતો દશસાહસ્રૈઃ સુમુખઃ પઞ્ચભિસ્તથા ।
પિઙ્ગલશ્ચ ત્રિસાહસ્રૈઃ કુમુદોઽષ્ટસહસ્રકૈઃ ॥ ૫૩॥

પૂર્ણભદ્રોઽયુતેનાગાત્ સુભદ્રઃ સપ્તભિર્યયૌ ।
વિલોમા દશસાહસ્રૈઃ પિઙ્ગલોઽથાષ્ટભિર્યયૌ ॥ ૫૪॥

કુમ્ભાણ્ડઃ ષટ્સહસ્રેણ રણભદ્રોઽથ વિંશતિઃ ।
પ્રયુધાનો નિધાનશ્ચ અષ્ટાશીતિસહસ્રકૈઃ ॥ ૫૫॥

એતે ગણેશ્વરાસ્તત્ર સમાયાતાઃ પૃથક્ પૃથક્ ।
એતે ચાન્યેઽપ્યસઙ્ખ્યાતાસ્તત્રાજગ્મુર્ધૃતાયુધાઃ ॥ ૫૬॥

સર્વે ભસ્માવદાતાશ્ચ જટામકુટધારિણઃ
નીલકણ્ઠાસ્ત્રિણેત્રાશ્ચ હારકેયૂરપન્નગાઃ ॥ ૫૭॥

નિષઙ્ગિણશ્ચ સર્વેઽપિ શરકાર્મુકપાણયઃ ।
સમાગતાંસ્તાન્ ગણપાન્નિવેદ્ય સુરસત્તમાન્ ॥ ૫૮॥

નન્દિકેશઃ પુરસ્તસ્થૌ હરિણાજિષ્ણુના તથા ।
તાનાગતાનથ જ્ઞાત્વા મહાદેવો વૃષં તદા ॥ ૫૯॥

ચક્રે તુરઙ્ગમાકારં શ્વેતાભ્રશિખરોપમમ્ ।
રત્નપલ્યાણસંયુક્તં સુખલીનાસ્યકં તથા ॥ ૬૦॥

સ્વયં ચ મુકુટોદ્દામશોભી ચન્દ્રાર્કભાસુરઃ ।
રત્નમુક્તાલસદ્ધારો રત્નગ્રૈવેયકાઙ્ગદઃ ॥ ૬૧॥

ત્રિલોચનોઽરવિન્દાક્ષો લસદ્દિવ્યામ્બરો બભૌ ।
સુમનોવર્ષનિકરૈરભિવૃષ્ટો મહેશ્વરઃ ॥ ૬૨॥

દુન્દુભીનાં નિનાદૈશ્ચ વેદબન્દિકૃતસ્તવૈઃ ।
જપતાં ગણદેવાનાં સ્તવૈર્નીરાજનૈઃ સ્ત્રિયાં (?) ॥ ૬૩॥

નન્દિનો હસ્તમાલમ્બ્ય તણ્ડુસન્ધૃતછત્રકઃ ।
રત્નપાદુકપાદાબ્જો નિર્યયૌ સ ગણૈઃ સુરૈઃ ॥ ૬૪॥

હરિણા ચાથ શક્રેણ પ્રોત્સારિતસુરાસુરઃ ।
આલોકનેન સર્વેષાં પ્રણામાલિં પ્રગૃહ્ય ચ ॥ ૬૫॥

નદત્સુ ગજભેરીષુ(?) શઙ્ખધ્માતાસુ દિક્ષ્વપિ ।
વર્ષત્સુ અભ્રેષુ કુસુમં નૃત્યન્તીષ્વપ્સરસ્સુ ચ ॥ ૬૬॥

નારદસ્તુમ્બુરુશ્ચાપિ વીણયાઽગાયતાં તદા ॥ ૬૭॥

તુઙ્ગં તુરઙ્ગમધિરુહ્યપિનાકપાણિ-
રશ્વાધિપઃ સુરવરૈર્ગણમુખ્યસઙ્ઘૈઃ ।
પાદાતિભિર્હરિમહેન્દ્રમુખૈશ્ચ સિદ્ધૈઃ
સમ્પૂજિતો ગિરિવરસ્ય ગૃહં જગામ ॥ ૬૮॥

ત્વઙ્ગત્તુરઙ્ગસુખલીનવિચાલનેન
હૃષ્યત્પદાતિગણસન્ધૃતપાદપદ્મઃ ।
માયૂરવીજનસુવીજિતચામરૌઘૈઃ
છત્રાવૃતાસ્યકમલો ગિરિશઃ પ્રતસ્થે ॥ ૬૯॥

હિમાચલગૃહં યયૌ સુરવરૈર્ગણેન્દ્રૈર્હરો
નદત્સુગજપૃષ્ઠગૈર્વિજિતકાબ્ધિભેરીરવૈઃ ।
સુવર્ષિતસુરાઙ્ગનાકુસુમલાજકાર્દ્રાક્ષતૈઃ
સુરોરુસુપતાકિનીચલદપારવેત્રાગ્રકે ॥ ૭૦॥

નદત્સુગણબૃંહિતૈર્હયવરોરુહેષારવૈ
રથાઙ્ગપરિવર્તનૈઃ શ્રુતિશિરોગતૈશ્ચસ્તવૈઃ ॥ ૭૧॥

ધોતન્તિ તત્ર ગણપાઃ કિલ કામરૂપાઃ
શૂલાસિબાણવરહસ્તધૃતોર્ધ્વચાપાઃ ।
દેહપ્રભાવિજિત તપ્તસુજાતરૂપા
યૂપા ઇવાગ્રનિકરા અપિ ભૂપરૂપાઃ ॥ ૭૨॥

ઈશાનપૂજનનિરસ્તસમસ્તપાપાઃ ॥ ૭૩॥

ધૃતબાણગણા ગજેશ્વરાસ્તે
ભગણેશાનવિલાસિસત્કપર્દાઃ ।
ફણિભસ્મવિભૂષણા યયુર્વૈ
હર તે શરણં હૃદા સદા પ્રપન્નાઃ ॥ ૭૪॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે શિવોદ્વાહગમનવર્ણનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઈશાખ્યઃ દ્વાદશમાંશઃ । અધ્યાયઃ ૧૭ શિવોદ્વાહગમનવર્ણનમ્ । ૫-૭૪ ॥

- .. shrIshivarahasyam . IshAkhyaH dvAdashamAMshaH . adhyAyaH 17 shivodvAhagamanavarNanam . 5-74 ..

Notes:

Śiva શિવ mounted on Nandi નન્દિ; accompanied by several Deva-s દેવાઃ, Ṛṣi-s ઋષયઃ et al, along with an extensive complex retinue commences the journey towards the abode of Himācala હિમાચલ, for the Ceremony of Pāṇigrahaṇa પાણિગ્રહણ of Pārvatī પાર્વતી.

Proofread by Ruma Dewan

*Shivodvahagamanavarnanam*
pdf was typeset on December 28, 2024

Please send corrections to *sanskrit@cheerful.com*